आग्निवेश्य विवाह मन्त्राः

१. अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेण्यम् ।
समर्यमा संभगो नो निनीयात् सञ्जास्पत्यं सुयममस्तु देवाः ॥

२. मयि गृह्णाम्यग्रे अग्निं रायस्पोषाय सुप्रजस्त्वाय सुवीर्याय ।
मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम तनुवा सुवीराः ॥

३. यो नो अग्निः पितरो हृत्स्वन्तरमर्त्यो मर्त्यौं आविवेश ।
तमात्मन् परिगृह्णीमहे वयं मा सो अस्मां अवहाय परागात् ॥

१. प्रजापतिः स्त्रियां यशो मुष्कयोरदधात् सपम् । कामस्य तृप्तिमानन्दं तस्याग्ने भाजयेह मा । मोदः प्रमोद आनन्दो मुष्कयोर्निहितः सपः । सृत्वेव कामस्य तृप्याणि दक्षिणानां प्रतिग्रहे । मनसश्चित्तमाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य यशः श्रीः श्रयतां मयि । यथाहमस्या अतृपं स्त्रियै पुमान् यथा स्त्री तृप्यति पुंसि प्रिये प्रिया । एवं भगस्य तृप्याणि यज्ञस्य काम्यः प्रियाम् । आदित्यः सत्यभोमिति । आपस्तत् सत्यमाभरन् । यशो यज्ञस्य दक्षिणाम् । असौ मे कामः समृध्यताम् ॥

२. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

३. हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपः शं स्योना भवन्तु ॥

४. पवमानः सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा । पुनन्तु मा देवजनाः । पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः । जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँरनु ॥

५. या अकृन्तन्नवयन् या अतन्वत याश्च देवीरन्तानभितोऽददन्त ।
तास्त्वा देवीर्जरसा संव्ययन्त्वायुष्मतीदं परिधत्स्व वासः ।

६. परिधत्त धत्त वाससैनां शतायुर्षीं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद्वास एतत् सोमाय राज्ञे परिधातवा उ ।

७. जरां गच्छासि परिधत्स्व वासो भवा कृष्टीनामभिशस्तिपावती ।
शतं च जीव शरदः सुवर्चा रायश्च पोषमुपसंव्ययस्व ।

८. परीदं वासो अधिपाः स्वस्तयेऽभूरापीनामभिशस्तिपावति ।

शतं च जीव शरदः पुरूचीर्वसूनि चार्यो विभजासु जीवति ।

९. अनया सह मया कर्माणि कर्तव्यानि । प्रजाश्चोत्पदयितव्याः । तदर्थमेनां परिणेष्ये ॥

१०. इन्द्राय नमः । अग्नये नमः । यमाय नमः । निर्ऋतये नमः । वरुणाय नमः । सोमाय नमः । ईशानाय नमः । ब्रह्मणे नमः । अद्भ्यो नमः । अग्नये नमः । आत्मने नमः ॥

११. अदितेऽनुमन्यस्व । अनुमतेऽनुमन्यस्व । सरस्वतेऽनुमन्यस्व ।

१२. देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिवो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं न स्वदतु ॥

१३. अयं त इध्म आत्मा जातवेदस्तेनेध्यस्व वर्धस चेद्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनानाध्येन समेधय स्वाहा ॥

१४. प्रजापतये स्वाहा । इन्दाय स्वाहा । अग्नये स्वाहा । सोमाय स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । भूर्भुवःस्वः स्वाहा' ॥

१५. या तिरश्ची निपद्यसेऽहं विधरणी इति ।
तां त्वा घृतस्य धारया जुहोति वैश्वकर्मणि ॥

१६. यानूची निपद्यसेऽहं विधरणी इति । तां त्वा घृतस्य धारया अग्नौ ।
संराधन्यै देव्यै स्वाहा । प्रसाधन्यौ देव्यै स्वाहा ॥

२०. युक्तो वह जातवेदः पुरस्तादग्ने विद्धि कर्म क्रियमाणं ययेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता त्वया गा अश्वान् पुरुषान् सनेमि ॥
विरुपाक्षाय स्वाहा । दन्तान् जये स्वाहा ।

२१. विरूपाक्षमहं यजे निजङ्घं शबळोदरम् ।
यो मायं परिबाधते श्रियै पुष्ट्यै च तस्मै स्वाहा ॥

२२. परिबाध मा विबाधिष्ठा मा विबाध विबाधिथाः ।
निर्ऋत्यै त्वा पुत्रमाहुः स नः कर्माणि साध्य ॥

२३. सदस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषं ॥

२४. यावन्तो देवास्त्वयि जातवेदः स्रियं चोद्घ्नन्ति पुरुषस्य कर्म ।
तेभ्य एतद्धूयते भागधेयं ते मा तृप्तास्तर्पयन्तु कामैः ॥

२५. आकूत्यै त्वा कामाय त्वा समृधे त्वा । पुरो दधे अमृतत्वाय जीवसे ॥

२६. आकूतिमस्यावसे । काममस्य समृद्ध्यै । इन्द्रस्य युञ्जते धियः ॥

२७. आकूतिं देवीं मनसः पुरो दधे । यज्ञस्य माता सुहवा मे अस्तु । यदिच्छामि मनसा स कामः । विदेयमेनद्धृदये निविष्टं ॥ इष्टेभ्यः स्वाह । वषडनिष्टेभ्यः स्वाहा । भेषजं दुरिष्ट्यै स्वाहा । निष्कृत्यै स्वाहा । दौराध्यै स्वाहा । देवीभ्यस्तनूभ्यः स्वाहा । ऋद्ध्यै स्वाहा । समृद्ध्यै स्वाहा' । चित्ताय स्वाहा । चित्तये स्वाहा । आकूताय स्वाहा । आकूत्यै स्वाहा । विज्ञाताय स्वाहा । विज्ञानाय स्वाहा । मनसे स्वाहा । शकरीभ्यः स्वाहा । दर्शाय स्वाहा । पूर्णमासाय स्वाहा । बृहते स्वाहा । रथन्तराय स्वाहा ॥

२८. प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु ।
तस्मै विशः समनमन्त सर्वाः स उग्रः स हि हव्यो बभूव ॥

२९. अग्निर्भुतानामधिपतिः स मावतु स्वाहा । पितरः इन्द्रो ज्येष्टानामधिपतिः स मावतु स्वाहा । यमः पृथिव्या अधिपतिः स मावतु स्वाहा । वायुरन्तरिक्षस्याधिपतिः स मावतु स्वाहा । सूर्यो दिवोऽधिपतिः स मावतु स्वाहा । चन्द्रो नक्षत्राणामधिपतिः स मावतु स्वाहा । बृहस्पतिर्ब्रह्मणोऽधिपतिः स मावतु स्वाहा । मित्रः सत्यानामाधिपतिः स मावतु स्वाहा । वरुणोऽपामधिपतिः स मावतु स्वाहा । समुद्रः स्त्रोत्यानामधिपतिः स मावतु स्वाहा । अन्नँ साम्राज्यानामधिपति तन्मावतु स्वाहा । सोम ओषधीनामधिपतिः स मावतु स्वाहा । सविता प्रसवानामधिपतिः स मावतु स्वाहा । रुद्रः पशूनामधिपतिः स मावतु स्वाहा । त्वष्टा रुपाणामधिपतिः स मावतु स्वाहा । विष्णुः पर्वतानामधिपतिः स मावतु स्वाहा । मरुतो गणनामधिपतयस्ते मावन्तु स्वाहा । पितरः पितामाहाः परेऽवरे ततास्ततामहा इह मावत । अस्मिन् ब्रह्मचारिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मस्यां देवहूत्यां स्वाहा ॥

३०. ऋताषाड़तधामाग्निगन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा । ताभ्यः स्वाहा । सँहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयोऽप्सरस आयुवो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा । ताभ्यः स्वाहा । सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो बेकुरयो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा । ताभ्यः स्वाहा । भुज्युः सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसः स्तवा नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा । ताभ्यः स्वाहा । प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्तस्यर्कूसामान्यप्सरसो वह्नयो नाम स इदं

ब्रह्म क्षेत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा । ताभ्यः स्वाहा । इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरसो मुदा नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा । ताभ्यः स्वाहा ।

३१. अग्निरेतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदयँ राजा वरुणोऽनुमन्यतां यथेयं स्त्री पौत्रमघं न रोदात् ॥

३२. इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिप्रबुद्ध्यतामियं ॥

३३. मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु ।
मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज पश्यन्ती प्रजां सुमनस्यमानां ॥

३४. स्तनन्धयतस्ते पुत्रान् सविताभिरक्षतु । आ वाससः परिधानाद् बृहस्पतिर्विश्वदेवा अभिरक्षन्तु पश्चात् ॥

३५. अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघम् ।
शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुञ्चामि पाशं ॥

३६. ब्राह्मणं देवकृतं कल्पमानं तेन हन्ये निषदः पिशाचात् ।
क्रव्यादो मृत्युरधरान् पातयामि दीर्घमायुस्तव जीवन्तु पुत्रान् स्वाहा ॥

३७. शन्नो देविरभिष्टय आपो पीतये शंयोरभिस्रवन्तु नः॥

३८. देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।

३९. गृभ्णामि ते सौभग्त्वाय हस्तं मया पत्या जरदिष्टिर्यथासत् ।
भगो अर्यमा सविता पुरन्धिस्ते त्वा देवा अदुर्मह्यं पत्नीम् ॥

४०. अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुचर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥

४१. यां पूषन् शिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशति विस्रयातै यस्यामुशन्तः प्रहरेम शेफम् ॥

४२. सोमोऽददात् गन्धर्वाय गन्धर्वोऽग्नयेऽददात् ॥

४३. पशूंश्च मह्यं पुत्रांश्च ददार्वग्निरथो त्वा असावहम् ॥

४४. सोमः पथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुर्योऽहं मुनुष्यजाः ॥

४५. सरस्वति प्रेदमव सुभगे वाजीनीवति ।

४६. तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः ॥
४७. आतिष्ठेममश्मानमश्मेव त्वं स्थिरा भव ।
प्रमृणीहि दुरस्यून् सहस्व पृतनायतः ॥
४८. विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥
४९. इमान् लाजानावपामि समृद्धिकरणान्मम ।
मम तुभ्यं च संवननं तदग्निरनुमन्यताम् ॥
५०. भगेन त्वा संसृजामि मासरेण सुरामिव ॥
५१. इयं नार्यपब्रूते अग्नौ लाजानावपन्ती ।
दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥
५२. इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥
५३. तत्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ॥
५४. त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽवयासिसीष्ठाः ।
यजिष्ठो वह्नितम शोशुचानो विश्वा द्वेषाँसि प्रमुमुग्ध्यस्मत् ॥
५५. स त्वं नो अग्नेऽवमो भवेती नेदिष्ठो अस्या उषसो व्युष्टौ ।
अवयक्ष्व नो वरुणं रराणो वीहि मृडिकं सुहवो न एधि ॥
५६. त्वमग्ने अयास्ययासन्मनसा हितः । अयासन् हव्यमूहिषेऽयानो धेहि भेषजं ॥
५७. प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ॥
५८. यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणां ।
यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनराहार्जातवेदा विचर्षणिः ॥
५९. पुनरग्निश्चक्षुरदात् पुनरिन्द्रो बृहस्पतिः । पुनर्मे अश्विना युवं चक्षुराधत्तमक्ष्योः ॥
६०. अनाज्ञातं यदाज्ञातं यज्ञस्य क्रियते मधु ।
अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं ॥
६१. पुरुषसम्मितो यज्ञो यज्ञः पुरुषसम्मितः ।
अग्ने तदस्य कल्पय त्वं हि वेत्थ यथातथं ॥
६२. यत्पाकत्रा मनसा दीनदक्षान यज्ञस्य मन्वते मर्त्तासः ।
अग्निष्टद्धीता क्रतुविद्विजानन् यजिष्ठो देवां ऋतुशो यजाति ॥
६३. पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्वेदसे स्वाहा । यज्ञं पाहि विभावसो
स्वाहा । सर्वं पाहि शतक्रतो स्वाहा । भुरग्नये च पृथिव्यै च महते च स्वाहा ।

भुवो वायवे चान्तरिक्षाय च महते च स्वाहा । सुवरादित्याय च दिवे च महते च स्वाहा । भूर्भुवः स्वश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा । नमो देवेभ्यः स्वधा पितृभ्यो भूर्भुवस्वर्महरों स्वाहा । ओं स्वाहा । भूः स्वाहा । भुवः स्वाहा । स्वः स्वाहा । भुर्भुवःस्वः स्वाहा ॥

६४. यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् ।
अग्निष्टत् स्विष्टकृद्विद्वान् सर्वं स्विष्टं सुहुतं करोतु मे ॥

६५. अग्नये स्विष्टकृते सुहुतहुते सर्वहुते ।
सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे ॥

६५. अदितेऽन्वमंस्थाः । अनुमतेऽन्वमंस्थाः । सरस्वतेऽन्वमंस्था ॥

६६. देवसवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ।
दिवो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं न स्वदतु ॥

६७. अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । वायो व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । आदित्य व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । व्रतानाम् व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् ॥

६८. अमूहमस्मि सा त्वं सा त्वमस्यमूहं ऋगहमस्मि साम त्वं द्योरहं पृथिवी त्वम् ॥

६९. मम हृदये हृदयं ते अस्तु । मम चित्ते चित्तमस्तु ते । मम वाचमेकमनाः श्रुणु ।
मामेवानुव्रता सहचर्या मया भव । चाक्रवाकं संवननं यन्नदीभ्य उदाहृतम् ।
यद्देवगन्धर्वो वित्तः संवननं तेन संवनिनौ स्वः ।

७०. एकमिषे विष्णुस्त्वान्वेतु द्वे ऊर्जे विष्णुस्त्वान्वेतु त्रीणि व्रताय विष्णुस्त्वान्वेतु चत्वारि मायोभवाय विष्णुस्त्वान्वेतु पञ्च पशुभ्यो विष्णुस्त्वान्वेतु षड् रायस्पोषाय विष्णुस्त्वान्वेतु सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु । सखायौ सप्तपदाबभूव सख्यं ते गमेयं सख्यात्ते मा योषं सख्यान्मे मा योष्टाः ॥

७१. सप्तऋषयः प्रथमां कृत्तिकानामरुन्धतीम् । ध्रुवतां ये ह निन्युः । षट् कृत्तिका मुख्ययोगं वहन्तीयमस्माकं भ्राजत्वष्टमी ॥

६९. ध्रुवं नमस्यामि मनसा ध्रुवेण ध्रुवं नो सख्यं दीर्घमायुश्च भुयात् ।
अद्रुग्धावस्मिंश्च परे च लोके ध्रुवं प्रविष्टौ स्याम शरणं सुखार्तौ । शन्न एधि द्विपदे शं चतुष्पदे ॥

७४. इह गावो निषीदन्त्विहाश्वा इह पुरुषाः । इहो सहस्रदक्षिणो अधिपूषा निषीदतु ॥

७५. अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि

यास्यै पतिघ्नी तनूस्तामितो नाश्यामसि स्वाहा । वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि (ब्राह्मणस्त्वा नाथकाम उपधावामि) यास्यै पुत्रघ्नी तनूस्तामिते नाशयामसि स्वाहा । आदित्य प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामितो नाशयामसि स्वाहा । सर्व प्रायश्चित्ते त्वं प्रायश्चित्तिरसि ब्राह्मनस्त्वा नाथकाम उपधावामि योस्यै पतिघ्नी पुत्रघ्नी पशुघ्नी निन्दिता तनूस्तामितो नाशयामसि स्वाहा ।

७६. अग्ने व्रतपते उपयमनं व्रतं चरिष्यामि तच्छकेयम् तन्मे राध्यताम् । वायो व्रतपत आदित्य व्रतपते व्रतानां व्रतपते उपयमनं व्रतं चरिष्यामि तन्मे राध्यानाम् ॥

७७. आवाभ्यां दम्पतिभ्यां स्वस्ति भवन्तो ब्रुवन्तु । युवाभ्यां दम्पतिभ्यां स्वस्ति ॥

७८. तशिने शिवेन त्वाभिमृशति हस्तेनाविद्विषाणिना । यथा न विद्विषेमहि ॥

७९. ऋषभेण स्कन्दामि व्यस्य योनिं पतिरेतो गृहाण । पुमांस्त्री जायतां गर्भो अन्तः ॥

८०. आ ते योनिं गर्भ एतु पुमांसं गर्भमाधत्स्व । यन्तुभ्यं शिमिवाससि पुमांस्ते पुत्रो नारितं पुमाननुजायताम् । स संवर्धतां गर्भो दशमे मासि सूतवे ॥